**संस्कृत-वार्ता:**

**दिनाङ्क :-27.09.2024**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री परमश्रेष्ठः**

**प्रधानमन्त्री नरेन्द्रमोदी गतसायम् आभासीयमाध्यमेन परमरुद्रः इत्याख्यं सुपर कम्प्यूटिंग-सिस्टम-संगणक-तन्त्रस्य ऋतुविज्ञानस्य ऋतुदशा-विज्ञानस्य कृते च उच्चगुणवत्तायुक्त-संगणकस्य उद्घाटनं कृतवान् । ध्येयमस्ति यत् प्रायः त्रिंशदुत्तरैक- कोटि-रूप्यकैः परमरुद्रः इत्याख्यः समुच्चगुणवत्तायुतः संगणकः 'राष्ट्रिय-सुपर-कम्प्यूटिंग-मिशन' इत्यभियानान्तर्गतं दैशिकरूपेण एव विकसितः अस्ति ।**

**वैश्विकनवाचारसूचकाङ्क**

**भारत: वैश्विकनवाचारसूचकाङ्के (GII) चतुर्विंशत्यधिक द्विसहस्रतमे वर्षे त्रयस्त्रिंशदधिकैकशत-वैश्विक-अर्थव्यवस्थासु भारतं ऊनचत्वारिंशत् तमं स्थानं प्राप्तवान्।केन्द्रीयवाणिज्यउद्योगमन्त्री पीयूषगोयलः उक्तवान् यत् मध्यदक्षिण एशिययोः दशसु अर्थव्यवस्थासु भारतं प्रथमे स्थाने वर्तते । X इत्यत्र श्रीगोयलेन प्रधानमन्त्रिणः नरेन्द्रमोदिनः निर्णायकनेतृत्वस्य मार्गदर्शने उल्लेखनीयाः उपलब्धयः प्रकाशिताः यत् - "मध्य-दक्षिण-एशिया-देशयोः दशसु अर्थव्यवस्थासु भारतस्य प्रथमस्थानं, लघु-मध्यम-आय-अर्थव्यवस्थासु प्रथमस्थानं, विपो-संस्थायां चतुर्थं स्थानं च अस्ति" विज्ञान एवं प्रौद्योगिकी (S&T) इत्यस्मिन् Cluster इति स्थानम् अस्ति ।**

**केन्द्रीयसर्वकारस्य न्यूनतमवेतनः -**

**केन्द्रसर्वकारेण परिवर्तनीयमहत्कारवेतन संशोधनं कृत्वा न्यूनतमवेतनदरेषु वृद्धिः घोषिता। नूतनाः वेतनदराः आगामिमासस्य प्रथमदिनात् आरभ्य प्रभावं प्राप्नुयुः। न्यूनतमवेतनस्य दराः कौशलस्तरस्य आधारेण वर्गीकृताः सन्ति-अकुशलः, अर्धकुशलः, कुशलः, अत्यन्तं कुशलः च, तथैव भौगोलिकक्षेत्रेषु अ, ब, स च।**

**<u>हिजबुल - मृतः</u>**

**लेबनानस्य राजधान्यां बेरूतनगरे ह्यः इजरायलदेशस्य प्रहारेन हिजबुल्लाह सङ्घस्य शीर्षसेनापतिः मुहम्मद हुसैन सरूरः वायवीयाक्रमणे मृतः। अस्माकं संवाददात्रानुसारी इजरायल-रक्षासेना हिजबुल-सङ्घस्य विमानसेनापतेः मुहम्मद-हुसैन-सरुरस्य उपरि बेरूत-नगरे-आक्रमणे मृत्योः पुष्टिं कृतवान्। स्थित्यानुसारं लेबनानस्य बेरूत-स्थितेन भारतीय दूतावासेन इजराइलदेशस्य हिज्बुल्लाह-गुल्मस्य च मध्ये विवर्धमानं संघर्षं निध्याय भारतीय-नागरिकाः परामृष्टाः सन्ति यत् ते यथाशीघ्रं लेबनान-देशं त्यजेयुः। अथ च न केऽपि भारतीयाः मध्येयुद्धम् लेबनानस्य यात्रा नैव कुर्युः। येन तेषां प्राणसङ्कटं नैव भवेत्। अपि च दूतावासेन एतदपि भणितं यद् ये जनाः अत्रैव केनापि कारणेन निरूद्धाः सन्ति उत स्थातुं विवशाः सन्ति चेत् ते आवश्यक्तां विना गृहाद् बहिः नैव गच्छेयुः। सावधानतया कार्यं विदध्युः। निरन्तरं दूतावासस्य सम्पर्के तिष्ठेयुः चेति। ध्येयमस्ति यत् सद्यस्तनीने इजरायलदेशीये वायवीयाक्रमणे लेबनान-देशस्य अष्टपञ्चाशदुत्तर-पञ्च-शतमिताः जनाः पञ्चतां प्राप्ताः सन्ति। मृतकेषु पञ्चाशन्मिताः बालकाः अपि समाविशन्ति।**

**<u>भारत बांगलादेशयोः</u>**

**भारत बांगलादेशयोः मध्ये द्वितीयान्तिम निकष स्पर्धा अद्य कानपुरनगरस्य ग्रीन पार्क क्रिकेट् क्रीडाङ्गणे भविष्यति। अवधेयं वर्तते यत् भारतेन बाङ्गलादेशं प्रथमे**

निकष स्पर्धायां अशीत्यधिक द्विशतं धावनांकानां बृहद् अंकै: पराजितम् आसीत्। द्वितीयाया: निकष-क्रीडायाः भारतीयदले दलनायकः रोहित शर्मणम् समेत्य यशस्वीजायसवाल: शुभमन गिल: विराट कोहली, केएल राहुल: सरफराज खान: ऋषभ पन्त:, ध्रुव जुरेल: आर.अश्विन: रविन्द्र जडेजा, अक्षर पटेल: कुलदीप यादव: मोहम्मद सिराज: आकाश दीप: जसप्रीत बुमराह: यश दयाल: च सन्ति।